श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री अञ्जनशैलनाथस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री अञ्जनशैलनाथस्तोत्रम् ॥

पुलकिनि भुजमध्ये पूजयन्तं पुरन्ध्रीं
भुवननयनपुण्यं पूरिताशेषकामम्।
पुनरपि वृषशैले फुल्लनीलोत्पलाभं
पुरुषमनुभवेयं पुण्डरीकायताक्षम्॥ 1 ॥

आजानसौहृदमपारकृपामृताब्धिम्
अव्याजवत्सलमवेलसुशीलमाद्यम्।
आनन्दराशिमनुरागमयावरोधम्
आराधयामि हरिमञ्जनशैलनाथम्॥ 2 ॥

आताम्रपादमवदातसुवर्णचेलम्
आपीनबाहुशिखरोज्ज्वलशङ्खचक्रम्।
आविस्स्मिताननममन्ददयाकटाक्षम्
आराधयामि हरिमञ्जनशैलनाथम्॥ 3 ॥

अप्राकृतावयवसंहितसन्निवेशम्
आरूढयौवनमहीनकुमारभावम्।
अम्लानकान्तिमतिवाङ्मनसानुभावम्
आराधयामि हरिमञ्जनशैलनाथम्॥ 4 ॥

आशावकाशसमुदित्वरसर्वगन्धम्
आस्वादयत्सुगमसर्वरसस्वभावम्।
आश्लेषगम्यसुखसंस्पृशनातिरेकम्
आराधयामि हरिमञ्जनशैलनाथम्॥ 5 ॥

आदर्शयन्तमतिसङ्कुचिताक्षिशक्तिम्
आश्रावयन्तमखिलान् बधिरान् प्रकृत्या।
आभाषयन्तमभितो नतमूकवर्गम्
आराधयामि हरिमञ्जनशैलनाथम्॥ **6**॥

आधावयन्तमतिमारुतमेव पङ्गून्
आजानुलम्बिभुजयन्तमहो कुबाहून्।
अन्यांश्च कृत्तशिरसः प्रतिजीवयन्तम्
आराधयामि हरिमञ्जनशैलनाथम्॥ **7**॥

आजन्मनिर्धनजनानलकेशयन्तम्
अज्ञानपि त्रिदशदेशिकदेश्ययन्तम्।
अह्नाय वन्ध्यमपि मर्त्यमवन्ध्ययन्तम्
आराधयामि हरिमञ्जनशैलनाथम्॥ **8**॥

आबद्धकङ्कणमशेषशरण्यतायाम्
आपत्सहायमपराधसहं नतानाम्।
आसन्नसामगसुखालससूरिवर्गम्
आराधयामि हरिमञ्जनशैलनाथम्॥ **9**॥

अध्यासितासनसरोजसनूपुराङ्घ्रिम्
आमुक्तवीरकटकायतवृत्तजङ्घम्।
आश्चर्यजानुयुगमप्रतिमोरुकाण्डम्
आराधयामि हरिमञ्जनशैलनाथम्॥ **10**॥

आवर्तिनिम्ननिखिलाण्डनिदाननाभिम्
आयामिदोर्विवरकेलिगृहावरोधम्।
आबद्धरत्नमयभूषभुजाचतुष्कम्
आराधयामि हरिमञ्जनशैलनाथम्॥ **11**॥

अंसावलम्बिमणिकुण्डलकान्तगण्डम्
आविस्स्मितांशुमधुराधरबन्धुजीवम्।
आस्याब्जसौरभसमुत्सुकदीर्घनासम्
आराधयामि हरिमञ्जनशैलनाथम्॥ **12** ॥

अर्धेन्दुभास्वदलिकोल्लसदूर्ध्वपुण्ड्रम्
आलोलनीलकुटिलालकचारुवक्त्रम्।
आविर्मयूखमणिचूडमहाकिरीटम्
आराधयामि हरिमञ्जनशैलनाथम्॥ **13** ॥

वादिभीतिकरार्येण रचिता भावबन्धतः।
शोभते वेङ्कटाद्रीशविषया स्तुतिरद्भुता॥ **14** ॥

॥ इति श्री अञ्जनशैलनाथस्तोत्रं समाप्तम्॥